# ॥ रामस्तोत्रम् ॥

## मुनय ऊचुः

नमस्ते रामचन्द्राय लोकानुग्रहकारिणे।
अरावणं जगत्कर्तुमवतीर्णाय भूतले॥ ६३ ॥

ताटिकादेहसंहर्त्रे गाधिजाध्वररक्षिणे।
नमस्ते जितमारीच सुबाहुप्राणहारिणे॥ ६४ ॥

अहल्यामुक्तिसन्दायिपादपङ्कजरेणवे ।
नमस्ते हरकोदण्डलीलाभञ्जनकारिणे॥ ६५ ॥

नमस्ते मैथिलीपाणिग्रहणोत्सवशालिने।
नमस्ते रेणुकापुत्रपराजयविधायिने॥ ६६ ॥

सहलक्ष्मणसीताभ्यां कैकेय्यास्तु वरद्वयात्।
सत्यं पितृवचः कर्तुं नमो वनमुपेयुषे॥ ६७ ॥

भरतप्रार्थनादत्तपादुकायुगुलाय ते।
नमस्ते शरभङ्गस्य स्वर्गप्राप्त्यैकहेतवे॥ ६८ ॥

नमो विराधसंहर्त्रे गृध्रराजसखाय ते।
मायामृगमहाक्रूरमारीचाङ्गविदारिणे॥ ६९ ॥

सीतापहारिलोकेशयुद्धत्यक्तकलेवरम्।
जटायुषं तु सन्दह्य तत्कैवल्यप्रदायिने॥ ७० ॥

नमः कबन्धसंहर्त्रे शबरीपूजिताङ्घ्रये।
प्राप्तसुग्रीवसख्याय कृतवालिवधाय ते॥ ७१ ॥

नमः कृतवते सेतुं समुद्रे वरुणालये।
सर्वराक्षससंहर्त्रे रावणप्राणहारिणे॥ ७२ ॥

संसाराम्बुधिसन्तारपोतपादाम्बुजाय ते।
नमो भक्तार्तिसंहर्त्रे सच्चिदानन्दरूपिणे॥ ७३ ॥

नमस्ते रामभद्राय जगतामृद्धिहेतवे।
रामादिपुण्यनामानि जपतां पापहारिणे॥ ७४ ॥

नमस्ते सर्वलोकानां सृष्टिस्थित्यन्तकारिणे।
नमस्ते करुणामूर्ते भक्तरक्षणदीक्षित॥ ७५ ॥

ससीताय नमस्तुभ्यं विभीषणसुखप्रद।
लङ्केश्वरवधाद्राम पालितं हि जगत्त्वया॥ ७६ ॥

रक्ष रक्ष जगन्नाथ पाह्यस्माञ्जानकीपते।
स्तुत्वैवं मुनयः सर्वे तूष्णीं तस्थुर्द्विजोत्तमाः॥ ७७॥

**श्रीसूत उवाच**

य इदं रामचन्द्रस्य स्तोत्रं मुनिभिरीरितम्।
त्रिसन्ध्यं पठते भक्त्या भुक्तिं मुक्तिं च विन्दति॥ ७८॥

प्रयाणकाले पठतो न भीतिरुपजायते।
एतत्स्तोत्रस्य पठनाद् भूतवेतालकादयः॥ ७९ ॥

नश्यन्ति रोगा नश्यन्ति नश्यते पापसञ्चयः।
पुत्रकामो लभेत्पुत्रं कन्या विन्दति सत्पतिम्॥ ८० ॥

मोक्षकामो लभेन्मोक्षं धनकामो धनं लभेत्।
सर्वान्कामानवाप्नोति पठन्भक्त्या त्विमं स्तवम्॥ ८१ ॥

॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये रामनाथलिङ्गप्रतिष्ठाविधिवर्णनं नाम चतुश्चत्वारिंशोऽध्यायतः मुनिभिः कृतं रामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Munikrta_Rama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits